योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०६४

चतुःषष्टितमः सर्गः ६४

श्रीवसिष्ठ उवाच ।
ततस्तत्कुवलोल्लासिमालतीमाल्यलोचना ।
ललना ललितालोक्य लीलयाऽऽलपिता मया ।। १
का त्वं कमलगर्भाभे किमर्थं मामुपागता ।
कस्यासि किं प्रार्थयसे क्व गतासि किमास्पदा ।। २
विद्याधर्युवाच ।
मुने शृणु यथावत्त्वमात्मोदन्तं वदाम्यहम् ।
प्रष्टुमर्हसि विस्रब्धमार्तां करुणयार्थिनीम् ।। ३
परमाकाशकोशस्य कस्मिंश्चित्कोणकोटरे ।
युष्माकं संस्थितं किंचिदिदं तावज्जगद्गृहम् ।। ४
पातालभूतलस्वर्गा इहापवरकास्त्रयः ।
कल्पनैका कुमार्यत्र कृता धातृत्वमायया ।। ५
तत्र द्वीपैः समुद्रैश्च वलितं वलयैरिव ।
पाटलोत्थं जगल्लक्ष्म्याः प्रकोष्ठमिव भूतलम् ।। ६
अन्ते द्वीपसमुद्राणां सर्वदिक्कमवस्थिता ।
योजनानां सहस्त्राणि दश हेममयी मही ।। ७
स्वयंप्रकाशसंकल्पफलदाम्बरनिर्मला ।
चिन्तामणिमयी स्वच्छा स्वच्छायाजितविष्टपा ।। ८
साप्सरोमरसिद्धानां लीलाविहरणावनिः ।
संकल्पमात्रसंपन्नसर्वसंभोगसुन्दरी ।। ९
अन्ते तस्या भुवः शैलो लोकालोकोऽस्ति विश्रुतः ।
भूपीठस्य प्रकोष्ठस्य वलयावलनां दधत् ।। 6.2.64.१०
क्वचिन्नित्यं तमोव्याप्तो मूढबुद्धेरिवाशयः ।
क्वचिन्नित्यं प्रकाशात्मा मनः सत्त्ववतामिव ।। ११

क्वचिदाह्लादजनकः साधूनामिव संगमः ।
क्वचिदुद्वेगजनको मूर्खैरिव समागमः ।। १२
क्वचित्प्रकटसर्वार्थो मनो मतिमतामिव ।
क्वचिदत्यन्तगहनो मूर्खश्रोत्रियचित्तवत् ।। १३
क्वचिदप्राप्तसोमांशुः क्वचिदप्राप्तसूर्यभाः ।
क्वचिल्लोकमयस्तेन क्वचिदाशून्यदिक्तटः ।। १४
क्वचिद्देवपुरव्याप्तः क्वचिद्दैत्यपुरान्वितः ।
क्वचित्पातालगहनः क्वचिच्छृङ्गोर्ध्वकन्धरः ।। १५
क्वचिच्छवभ्रभ्रमद्गृध्रः क्वचित्सानुमनोहरः ।
क्वचिच्छृङ्गशिखाक्रान्तवैरिञ्चनगरान्तरः ।। १५
क्वचिच्छून्यमहारण्यवहत्कल्पान्तमारुतः ।
क्वचित्पुष्पवनोद्यानगायद्विद्याधरीगणः ।। १७
क्वचित्पातालगम्भीरगुहाकुम्भाण्डभीषणः ।
क्वचिन्नन्दनसोदर्यमुन्याश्रममनोरमः ।। १८
क्वचिदक्षयमत्ताभ्रः क्वचिद्दुर्लभवारिदः ।
क्वचिद्दर्भगुहाश्वभ्रगहनोपान्तमण्डलः ।। १९
क्वचित्क्षुब्धजनाक्षेपसमुत्सादितभूतभूः ।
क्वचिद्वास्तव्यजनतासौजन्यजितविष्टपः ।। 6.2.64.२०
क्वचिन्नित्यं वहद्वाताजातस्थावरजङ्गमः ।
क्वचित्सर्वक्षयोन्मुक्तस्थिरस्थावरजङ्गमः ।। २१
क्वचिन्महामरुमरुन्मुक्तभांकारभीषणः ।
क्वचित्कणत्कमलिनीमत्तसारसभूषणः ।। २२
क्वचित्सलिलकल्लोलजलदोल्लासघर्घरः ।
क्वचिन्मत्ताप्सरोदोलाविलासजनितस्मरः ।। २३
क्वचित्पिशाचकुम्भाण्डवेष्टिताचेष्टदिक्तटः ।
क्वचिद्विद्याधरीसिद्धनृत्यगीतसरित्तटः ।। २४
क्वचिदुद्धर्षदम्भोदसरिद्वाहुलुठत्तटः ।
क्वचित्सततगानीतनीतनानाभ्रसत्पटः ।। २५
क्वचित्कमलिनीकोशवक्त्रस्थाध्यानमण्डलः ।
क्वचित्स्वर्गाङ्गनासिद्धसुन्दरीदन्तमण्डनः ।। २६

क्वचित्तपद्दिनकरजनताचारसुन्दरः ।
क्वचिन्नैशतमोगेहनृत्यन्मत्तनिशाचरः ।। २७
क्वचिदुत्पतदुत्पाततया नश्यज्जनावनिः ।
क्वचित्सौराज्यसंपत्त्या प्रोद्भवत्पुरमण्डलः ।। २८
क्वचिदत्यन्तनिःशून्यः क्वचिज्जनपदावृतः ।
क्वचिच्छ्वभ्रान्तगम्भीरः क्वचित्पातालभीषणः ।। २९
क्वचिद्बृहत्कल्पतरुः क्वचिन्निर्जलजङ्गमः ।
क्वचिन्महाकरिकुलः क्वचिन्मत्तहरिव्रजः ।। 6.2.64.३०
क्वचिन्निर्भूतमुद्यातः क्वचिदुन्मत्तराक्षसः ।
क्वचित्करञ्जगहनः क्वचित्तालमहावनः ।। ३१
क्वचिद्व्योमोपमसराः क्वचिद्दीर्घमरुस्थलः ।
क्वचिन्नित्यभ्रमत्पांसुः क्वचित्सर्वर्तुकाननः ।। ३२
शिखरेषु शिलास्तस्य सामान्याचलसंनिभाः ।
सन्ति सुस्थितकल्पाभ्रा रत्नमय्योऽम्बरामलाः ।। ३३
क्षीरोदकार्कगौरीणां वनस्कन्धौकसामिव ।
विश्राम्यन्त्यनिशं यासु हरयो हरियोनयः ।। ३४
तासामुत्तरदिग्भागे पूर्वशृङ्गशिलोदरे ।
निवसाम्यहमक्षीणवज्रसारसमत्वचि ।। ३५
विधिना तत्र बद्धास्मि वसाम्युपलयन्त्रके ।
अत्रासंख्या मुने याता मन्ये युगगणा मम ।। ३६
न केवलमहं बद्धा यावद्भर्तापि तत्र मे ।
बद्धः सायंतने पद्मकुङ्मले षट्पदो यथा ।। ३७
तेन सार्धं मया भर्त्रा शिलाकोटरसंकटे ।
अनुभूताश्चिरं कालमत्र वर्षगणा गताः ।। ३८
अद्याप्यात्मैकदोषेण न हि मोक्षं लभावहे ।
चिरं तत्रैव तिष्ठावस्तथैवाबद्धभावनौ ।। ३९
पाषाणसंकटे तस्मिन्बद्धावावां न केवलम् ।
बद्धो यावदशेषेण परिवारोऽपि तत्र नौ ।। 6.2.64.४०
पुराणपुरुषो बद्धो द्विजस्तत्रास्ति मे पतिः ।
एकस्थानान्न चलति जीवन्युगशतान्यसौ ।। ४१

आबाल्याद्ब्रह्मचारी च श्रोत्रियः पाठकोऽलसः ।
एकान्त एक एवास्तेऽजिह्मवृत्तिरचापलः ।। ४२
अहं व्यसनिनी भार्या तस्य वेदविदां वर ।
न निमेषं समर्थास्मि तं विना देहधारणे ।। ४३
शृणु तेन कथं ब्रह्मन्भार्याहं समुपार्जिता ।
कथं वृद्धिमयं यातः स्नेहोऽस्माकमकृत्रिमः ।। ४४
तेन जातेन मद्भर्त्रा बालेनैव सता पुरा ।
किंचिज्ज्ञेन सतैकेन तिष्ठतात्मालयेऽमले ।। ४५
श्रोत्रियत्वानुरूपेण जाया मे जन्मशालिनी ।
कुतः संभवतीत्येव निर्णीय चिरचिन्तया ।। ४६
स्वयमेवानवद्याङ्गी तेन तामरसेक्षण ।
उत्पादितास्मि नाथेन ज्योत्स्नेव शशिनाऽमला ।।४७
मनसा मानसीभार्या मन्दरोत्तमसुन्दरी ।
ततो वृद्धिं प्रयातास्मि वसन्त इव मञ्जरी ।। ४८
सहजाम्बरसंछन्ना भूतानां चित्तहारिणी ।
पूर्णेन्दुबिम्बवदना द्यौरिवामलतारका ।। ४९
कोरकोच्चस्तनभरा समग्ररसशालिनी ।
लतावरवनेनेव करपल्लवशालिनी ।। 6.2.64.५०
सर्वस्य जन्तुजातस्य नित्यं हृदयहारिणी ।
हरिणीतारनयना मदनोन्माददायिनी ।। ५१
लीलाविलासैकरता हेलावलितलोचना ।
गेयवाद्यप्रिया नित्यं न च तृप्तानुरागिणी ।। ५२
सौभाग्यभोगपरमा लक्ष्म्यलक्ष्म्योः प्रिया सखी ।
अनन्या मोहजालानामखिन्ना संपदापदोः ।। ५३
न केवलमहं गेहं धारयामि द्विजन्मनः ।
यावत्त्रैलोक्यसदनमिदमङ्ग बिभर्म्यहम् ।। ५४
अहं कुलकरी भार्या कलत्रभरणक्षमा ।
त्रैलोक्यगृहसंभारधारणैकभरोद्वहा ।। ५५
अथाहं तरुणी जाता समुद्भिन्नोन्नतस्तनी ।
लतोल्ललद्गुलुच्छेव विलासरसशालिनी ।। ५६

पतिर्मा दीर्घसूत्रत्वाच्छ्रोत्रियत्वात्तपोरतः ।
कयाप्यपेक्षयाद्यापि न विवाहितवानिमाम् ।। ५७
तेन यौवनसंपन्नविलासरसशालिनी ।
तं विना व्यसनेनाहं दह्येऽग्नाविव पद्मिनी ।। ५८
शीतानिलविलोलासु नलिनीषु निरन्तरम् ।
अङ्गदाहमवाप्नोमि पूताङ्गारस्थलीष्विव ।। ५९
उद्यानावनयः सर्वाः पूर्णाः कुसुमवर्षणैः ।
संपन्नास्तप्तसिकताः शून्या मे मरुभूमयः ।। 6.2.64.६०
जलकल्लोलकह्लारकमलोत्करकोमलाः ।
सरस्यः सारसारावसरसा मम नीरसाः ।। ६१
अहं पुष्करमन्दारकुमुदोत्करमालिता ।
भृशं दाहमवाप्नोमि कण्टकेष्विव दोलिता ।। ६२
कुमुदोत्पलकह्लारकदलीतल्पपालयः ।
मदङ्गसङ्गमाद्ग्रीष्ममर्मरा याति भस्मताम् ।। ६३
यत्कान्तमुचितं स्वादु विचित्रं चित्तहारि च ।
तदालोक्य भवाम्यन्तर्बाष्पपूर्णायतेक्षणा ।। ६४
व्यसनानलसंतप्ताः पतन्तो बाष्पबिन्दवः ।
छमच्छमिति मज्जन्ति कमलोत्पलपङ्क्तिषु ।। ६५
कदलीकन्दलीस्कन्धदोलान्दोलनलीलया ।
लालितोद्यानखण्डेषु मुखमाच्छाद्य रोदिमि ।। ६६
तुषारनिकराकीर्णं कदलीदलमण्डपम् ।
पश्याम्यूष्माणमुज्झन्तं खदिराङ्गारभीषणम् ।। ६७
नलिनीनालदोलासु सारसीं सारसाश्रिताम् ।
दीनानना विलोक्यान्तर्निन्दामि निजयौवनम् ।। ६८
रम्ये रोदिमि मध्यस्थे पदार्थे यामि सौम्यताम् ।
हृष्याम्यशोभने दीना न जाने किमहं स्थिता ।। ६९
दृष्टानि कुन्दमन्दारकुमुदानि हिमानि च ।
मया कामाग्निदग्धानां भस्मानीव दिशं प्रति ।। 6.2.64.७०
आनीलपल्लवमृणाललतोत्पलानां
कह्लारकुन्दकदलीदलमालतीनाम् ।

शय्या ममाङ्गचलनेन विशोषयन्त्या
व्यर्थं गतानि नवयौवनवासराणि ।। ७१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मोक्षो० निर्वाणप्रकरणे उ० पा० विद्याधरीव्यसनवर्णनं नाम चतुःषष्टितमः सर्गः ।। ६४।।